अनुक्रमाङ्क ..............................                                                  कूट सं. : 820153-$SA_2$ (M)

कृपया जाँच कर लें कि इस प्रश्न-पत्र में कुल 21 प्रश्न हैं और कुल 12 मुद्रित पृष्ठ हैं।

कक्षा - अष्टमी

# संस्कृतम्

(सङ्कलनात्मकं मूल्याङ्कनम् - II)

---

निर्धारित-अवधिः - होरात्रयम्                                                  पूर्णाङ्काः - 90

---

निर्देशाः -

1. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
2. प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
3. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् क्रमे लेखनीयानि।
4. प्रश्नपत्रे उत्तराणि न लेखनीयानि।
5. प्रश्नसङ्ख्या प्रश्नपत्रानुसारं लेखनीया।
6. खण्डसङ्ख्या अपि लेखनीया।

---

## खण्डः-'क' (अपठित-अवबोधनम्)                                                  5

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत -

भारतदेशः कृषिप्रधानदेशः अस्ति। भारतस्य अधिकांश-जनाः ग्रामे एव वसन्ति। ग्राम्यजीवनं नगरस्य जीवनात् भिन्नम् एव भवति। ग्राम्यजीवनं सुव्यवस्थितं भवति। ग्रामाः प्रदूषणरहिताः सन्ति अतः ग्रामे प्रायः सर्वे जनाः स्वस्थाः भवन्ति। ते प्रातःकालात् सायं यावत् क्षेत्रेषु कार्यं कुर्वन्ति। ते क्षेत्रेषु धान्यादिकम् उत्पादयन्ति। अधुना तु ग्रामे कृषकाः अनेकेषां वैज्ञानिकोपकरणानाम् अपि प्रयोगं कुर्वन्ति। वैज्ञानिकोपकरणानां प्रयोगेण कृषिव्यवसायः तु प्रतिदिनं वर्धते एव।

(I) एकपदेन उत्तरत -                                                  ½×2=1

(क) कः कृषिप्रधानदेशः अस्ति?

(ख) ग्रामीण-जनाः

(II) एकवाक्येन उत्तरत - 1×2=2

(क) ग्रामीण-जनाः क्षेत्रेषु कदा कार्यं कुर्वन्ति?

(ख) केषां प्रयोगेण कृषिव्यवसायः प्रतिदिनं वर्धते?

(III) निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत - ½×4=2

(क) सुव्यवस्थितम् इति पदस्य विशेष्यपदं किम्?

(i) नगरजीवनं (ii) कृषकाः

(iii) ग्राम्यजीवनं (iv) जनाः

(ख) 'ग्रामे सर्वे स्वस्थाः भवन्ति' अस्मिन् वाक्ये क्रियापदं किम्?

(i) ग्रामे (ii) सर्वे

(iii) स्वस्थाः (iv) भवन्ति

(ग) 'निरामयाः' इत्यर्थे गद्यांशे किं पदं प्रयुक्तम्?

(i) परिश्रमशीलाः (ii) स्वस्थाः

(iii) ग्रामीणाः (iv) सञ्जातः

(घ) अस्वस्थाः इतिपदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(i) स्वस्थः (ii) स्वस्थम्

(iii) सुव्यवस्थितम् (iv) स्वस्थाः

**खण्डः-'ख' (रचनात्मककार्यम्)** (15)

2. अद्यः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखत- 1×5=5



मञ्जूषा -

| |
|---|
| बालकाः, बालिका, पुष्पाणि, वृक्षः, खगः, दोलाम्, उद्यानस्य, तित्तिलिका, काष्ठफलके, उपविशति, खेलतः, वृक्षे, विकसन्ति, उद्याने, पुष्पेषु |

3. भवान् माधवः। भवतां विद्यालये 'संस्कृतसप्ताहः' आयोजितः आसीत्। स्वानुभवान् वर्णयन् स्वमित्रं सौरवं प्रति लिखिते पत्रे मञ्जूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयत – ½×10=5

नवदिल्लीतः

तिथि : .....................

प्रिय मित्र सौरव,

(i) ...................... नमस्ते।

अत्र सर्वं (ii) ......................, तत्र अपि अस्तु। (iii) ...................... अस्माकं विद्यालये (iv) ...................... आयोजितः आसीत्। सप्ताहपर्यन्तं वयं संस्कृतेन (v) ...................... अभ्यासं कृतवन्तः। सप्ताहान्ते (vi) ...................... श्लोकगायनम्, एकस्याः (vii) ...................... मञ्चयनं च अकुर्मः। अहं तु इदानीं (viii) ...................... संस्कृतेन एव सम्भाषणं करोमि। मातृपितृभ्यां (ix) ...................... नमः।

तव (x) ...................... मित्रम्

माधवः

| मञ्जूषा : | लघुनाटिकायाः, सम्भाषणस्य, कुशलम्, सादरं,<br>वयं अगस्तमासे, अभिन्नं, सप्रेम, संस्कृतसप्ताहः, सर्वदा |
|---|---|

4. अधोलिखितं संवादं पठित्वा मञ्जूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयत – ½×10=5

सुरभिः – आयि! ललिते, त्वं शीघ्रं शीघ्रं (i) .................... गच्छसि?

ललिता – विद्यालयम्

सुरभिः – विद्यालयम्। परम् अद्य तु (ii) .................... अस्ति। अतः अवकाशः अस्ति।

ललिता – जानामि अहम्।

सुरभिः – तर्हि किमर्थम् गच्छसि?

ललिता – किं त्वं न (iii) ....................?

सुरभिः – किम्?

ललिता – प्रधानमन्त्रिणा (iv) .................... स्वच्छ-भारत-अभियानम्।

सुरभिः – तत् तु जानामि (v) ....................।

| | | |
|---|---|---|
| ललिता | – | स्वच्छ-भारत-अभियानम् अधिकृत्य विद्यालये एकः (vi) ............... अस्ति। |
| सुरभिः | – | (आश्चर्येण) तत्र कार्यक्रमः अस्ति। |
| ललिता | – | आम्। |
| सुरभिः | – | तत्र किं किं (vii) .................... भविष्यति। |
| ललिता | – | वयं सर्वे (viii) .................... विद्यालयं स्वच्छं करिष्यामः। |
| सुरभिः | – | ततः। |
| ललिता | – | वयं (ix) .................... करिष्यामः। |
| सुरभिः | – | कीदृशी प्रतिज्ञा? |
| ललिता | – | वयं (x) .................... आजीवनं पालनं करिष्यामः |

मञ्जूषा : जानासि, अहंम्, कार्यक्रमः, मिलित्वा, स्वच्छतायाः, चालितम्, कार्यम्, गान्धिजयन्ती, कुत्र, प्रतिज्ञां

## खण्डः-'ग' (अनुप्रयुक्त-व्याकरणम्) (35)

5. अधोलिखितवाक्येषु रेखाङ्कि.तपदेषु सन्धिं सन्धिच्छेदं वा कुरुत – 1×3=3

(1) सर्वे छात्राः पाठं <u>अद्य+एव</u> स्मरन्तु।

(2) <u>मात्राज्ञा</u> सदैव पालनीया।

(3) आचार्यः वदति-<u>स्वस्ति</u> युष्मभ्यम्।

6. (अ) विकल्पेभ्यः उचितं शब्दरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत – ½×6=3

(क) माता ..................... भोजनम् यच्छति।

(i) साधुना (ii) साधुभ्यः

(iii) साधवः (iv) साधोः

(ख) ..................... एव अस्माकम् बलम्।

(i) मतिः (ii) मती

(iii) मत्या (iv) मतये

(ग) शिष्याः ..................... सह वसन्ति।

(i) मुनिम् (ii) मुनये

(iii) मुनिना (iv) मुनीनाम्

(घ) पुत्राः ..................... नमन्ति।

(i) माता (ii) मातुः

(iii) मात्रे (iv) मातरम्

(ङ) रामः ..................... आज्ञाम् पालयति।

(i) पिता (ii) पितुः

(iii) पित्रा (iv) पितरौ

(च) जनाः ..................... आदरं कुर्वन्ति।

(i) विदुषः (ii) विद्वांसः

(iii) विदुषाम् (iv) विद्वान्

(आ) उचितं सर्वनामरूपं चित्वा रिक्तस्थानानि पूरयत - (1×3=3)

(क) वयं ..................... भाषां सदैव रक्षिष्यामः।

(i) एताः (ii) एतस्याः

(iii) एताम् (iv) एतम्

(ख) भक्ताः ..................... दर्शनाय गच्छन्ति।

(i) तस्य (ii) तस्यै

(iii) तस्मै (iv) तस्मिन्

(ग) ..................... स्थलानि आरक्षितानि सन्ति।

(i) इदम् (ii) इयम्

(iii) अयम् (iv) इमानि

7. (अ) कोष्ठके प्रदत्तसङ्ख्यां संस्कृतेन लिखत - (1×2=2)

(क) मम पार्श्वे (100) .............................. रूप्यकाणि सन्ति।

(ख) सभायां (56) .............................. दर्शकाः तिष्ठन्ति।

(आ) उचितं सङ्ख्यावाचकं पदं विकल्पेभ्यः चित्वा लिखत – (½×2=1)

(क) क्रीडाक्षेत्रे (3) .............................. मित्राणि क्रीडन्ति।

(i) त्रयः (ii) तिस्रः

(iii) त्रीणि (iv) त्रि

(ख) अत्र (2) .............................. नरौ परस्परं वदतः।

(i) द्वि (ii) द्वे

(iii) द्वा (iv) द्वौ

8. मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयत – (1×3=3)

(i) .................... मा वदत।

(ii) .................... शान्तं भवत।

(iii) कोलाहलं .................... कार्यं कुरुत।

**मञ्जूषा** | विना, उच्चैः, अधुना |

9. रेखाङ्कितपदेषु उपसर्गं संयोज्य पृथक् कृत्वा वा लिखत – 1×3=3

(i) नदी पर्वतात् निस्+सरति।

(ii) सः धनं वितरति।

(iii) शिष्याः गुरुं प्रति+वदन्ति।

10. रेखाङ्कितपदेषु विभक्तिं तत्कारणं च लिखत – 1×5=5

(i) नर्तकाय नृत्यं रोचते।

(ii) गृहेभ्यः बहिः अवकरं न क्षिपेत्।

(iii) चालकस्य पृष्ठतः जनाः तिष्ठन्ति।

(iv) गुरुः छात्रेषु विश्वसति।

(v) श्रीगुरवे नमः।

11. अधोलिखितेषु समस्तपदेषु समासस्य नामानि लिखत – 1×3=3

(i) यथाशक्ति (ii) पुष्पफलानि (iii) अतिबलम्

12. विकल्पेभ्यः उचितं धातुरुपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत - 1×5=5

(क) सज्जनाः कदापि धर्मं न.....................।

(i) त्यजति (ii) त्यजन्ति

(iii) त्यजामि (iv) त्यजामः

(ख) धावनप्रतियोगितायां मम विद्यालयस्य छात्राः पुरस्कारम् .....................।

(i) अलभत (ii) अलभेताम्

(iii) अलभन्त (iv) अलभे

(ग) वयं सम्पूर्णं विश्वम् आर्यं .....................।

(i) करिष्यावः (ii) करिष्यामि

(iii) करिष्यामः (iv) करिष्यति

(घ) त्वं शीघ्रं दुग्धं .....................।

(i) पिब (ii) पिवत

(iii) पिवतु (iv) पिबन्तु

(ङ) यूयं सदैव सत्यं .....................।

(i) वदेत् (ii) वदेयुः

(iii) वदेत (iv) वदेम

13. वाक्येषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत - 1×4=4

(i) श्रृगालः भोजनं (प्र+आप्+तुमुन्) ................... भ्रमति स्म।

(ii) कालिदासेन त्रीणि नाटकानि रचितानि।

(iii) मूषकाः इतस्ततः (भ्रम्+क्तवतु)।

(iv) अधुना अहं क्रीडितुम् इच्छामि।

**खण्डः-'घ' (पठित-अवबोधनम्) (35)**

14. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

एकदा एकस्मिन् वने एकः श्रृगालः भोजनं प्राप्तुम् इतस्ततः भ्रमति स्म। तदैव सः

मूषकाणां समूहं दृष्ट्वा तान् खादितुम् चिन्तयति। तस्य मूषक-समूहस्य राजा हृष्ट पुष्टः आसीत् शृगालः मूषकसमूहम् अनुसरति। तान् मूषकान् खादितुम् इच्छन् सः मूषकाणां बिलस्य समीपं गच्छति।

(I) एकपदेन उत्तरत - ½×2=1

(क) कः मूषकसमूहम् अनुसरति?

(ख) श्रृगालः कान् खादितुम् इच्छति स्म?

(ii) पूर्णवाक्येन उत्तरत - 1×2=2

(क) शृगालः किमर्थम् भ्रमति स्म?

(ख) कः हृष्टः पुष्टः आसीत्?

(iii) निर्देशानुसारम् उत्तरत - ½×4=2

(क) 'वने' इति पदस्य विशेषणपदं किम्?

| | |
|---|---|
| (i) एकदा | (ii) एकस्मिन् |
| (iii) एकः | (iv) शृगालः |

(ख) 'दूरम्' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

| | |
|---|---|
| (i) इच्छन् | (ii) खादितुम् |
| (iii) समीपम् | (iv) समूहम् |

(ग) 'विचारयति' इत्यर्थे गद्यांशे किं पदं प्रयुक्तम्?

| | |
|---|---|
| (i) चिन्तयति | (ii) अनुसरति |
| (iii) भ्रमति | (iv) खादितुम् |

(घ) 'वने शृगालः इतस्ततः भ्रमति' इति वाक्ये अव्ययपदं किम्?

| | |
|---|---|
| (i) वने | (ii) शृगालः |
| (iii) इतस्ततः | (iv) भ्रमति |

15. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम उत्तराणि लिखत - 5

वृत्तं यत्नेन संरक्षेत् वित्तम् आयाति याति च।
अक्षीणः वित्ततः क्षीणः वृत्ततः तु हतो हतः।।

(I) एकपदेन उत्तरत - (½×2=1)

(क) जीवने किम् आगच्छति गच्छति च?

(ख) वृत्तम् केन संरक्षेत्?

(ii) पूर्णवाक्येन उत्तरत - (1×2=2)

(क) कस्य नाशे मनुष्यः अपि नश्यति?

(ख) मनुष्यः कदा अक्षीणः एव तिष्ठति?

(iii) निर्देशानुसारम् उत्तरत - (½×4=2)

(क) 'आगच्छति' इति अर्थे श्लोके किं पदं प्रयुक्तम्?

(i) क्षीणः (ii) अक्षीणः

(iii) याति (iv) आयाति

(ख) 'क्षीणः' अस्य पदस्य किं विलोमपदं श्लोके प्रयुक्तम्?

(i) वित्ततः (ii) वृत्ततः

(iii) अक्षीणः (iv) हतः

(ग) श्लोकस्य प्रथमसङ्क्तौ कति क्रियापदानि सन्ति?

(i) त्रीणि (ii) चत्वारि

(iii) पञ्च (iv) षट्

(घ) अन्तिमपङ्क्तौ किम् अव्ययपदं प्रयुक्तम्?

(i) क्षीणः (ii) वृत्ततः

(iii) तु (iv) हतः

16. अधोलिखितं संवादं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

(तदैव मान्यवरः संस्कृतस्य अध्यापकः कक्षां प्रविशति)

सर्वे छात्राः - (उत्थाय) वयं प्रणमामः मान्यवर।

आचार्यः - सुखिनः भवन्तु। शुभपन्थाः। तिष्ठन्तु।

(सर्वे उपविशन्ति जिज्ञासया आचार्यं पश्यन्ति)

आचार्यः - (सर्वान् दृष्ट्वा) किञ्चित् विशिष्टं कथमितुम् अथवा ज्ञातुम् इच्छन्ति।

सर्वे - (मिलित्वा) आम् मान्यवर! वयम् अस्माकं पूर्व राष्ट्रपति महोदयानां जीवनस्य विषये ज्ञातुम् इच्छामः। कृपया वदन्तु।

आचार्यः - अतीव शोभनम्।

(I) एकपदेन उत्तरत - (½×2=1)

(क) छात्राः कम् पश्यन्ति?

(ख) छात्राः केषां जीवनस्य विषये ज्ञातुम् इच्छन्ति?

(ii) पूर्णवाक्येन उत्तरत - (1×2=2)

(क) कः कक्षां प्रविशति?

(ख) आचार्यः छात्रान् किं पृच्छति?

(iii) निर्देशानुसारम् उत्तरत - (½×4=2)

(क) 'इच्छामः' इति क्रियापदस्य कर्तृपदं किम्?

(i) अस्माकं (ii) वयम्

(iii) ज्ञातुम् (iv) आम्

(ख) 'तिष्ठन्ति' इत्यर्थे संवादे किं पदं प्रयुक्तम्?

(i) प्रविशति (ii) तिष्ठन्तु

(iii) उपविशन्ति (iv) पश्यन्ति

(ग) 'दुखिनः' इति पदस्य किं विलोमपदं संवादे प्रयुक्तम्?

(i) सुखिनः (ii) भवन्तु

(iii) शुभपन्थाः (iv) तिष्ठन्तु

(घ) 'कथयितुम् अथवा ज्ञातुम् इच्छन्ति' इति वाक्ये अव्ययपदं किम्?

(i) कथयितुम् (ii) अथवा

(iii) ज्ञातुम् (iv) इच्छन्ति

17. मञ्जूषायां प्रदत्तैः पदैः भावार्थे रिक्तस्थानानि पूरयित्वा भावार्थं लिखत - 1×4=4

(अ) गतः कालो न पुनरूपैति।

भावार्थः - शीघ्रम् एव कार्याणि करणीयानि। (i) ................ नष्टः न करणीयः यतः क्षणेन क्षणेन यः समयः व्यतीतः भवति सः (ii) ................ न आगच्छति। अतः समयस्य महत्त्वं ज्ञातव्यम्।

(आ) अङ्गीकृतं सुकृतिनो न परित्यजन्ति।

भावार्थः - सज्जनाः (i) ................ स्वीकृत्य सम्पूर्णं कुर्वन्ति, कार्यं (ii) ................ अस्ति' इति चिन्तयित्वा कदापि त्यजन्ति न।

मञ्जूषा - | कार्यम्, समयः, कठिनम्, पुनः |

18. अधोलिखितौ श्लोकौ पठित्वा उचितपदैः अन्वयं पूरयत - (½×8=4)

(अ) क्षणशः कणशः चैव विद्याम् अर्थं च साधयेत्।
क्षणत्यागे कुतः विद्या कणत्यागे कुतः धनम्।।

अन्वयः - क्षणशः (i) ..................... कणशः च (ii) ................... अर्थं साधयेत्। (iii) .................. विद्या कुतः (iv) .............. धनम् कुतः?

(आ) येषां न विद्या न तपो न दानम्, ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूताः मनुष्यरूपेण मृगाः चरन्ति।।

अन्वयः - येषां न विद्या न तपः न दानं न (i) ..................... न शीलं न गुणः न (ii) ..................... च (भवति)। ते (जनाः) (iii) ..................... भूवि भारभूताः (iv) ................. मृगाः (इव) चरन्ति।

19. अधोलिखितानि वाक्यानि कथाक्रमानुसारं लिखत - (1×5=5)

(क) तस्य शिष्याः क्रुद्धाः अभवन्।

(ख) सः यात्री लज्जितः अभवत्।

(ग) महर्षि दयानन्दः काशीनगरे अतिष्ठत्।

(घ) महर्षिः तस्मै यात्रिणे फलानि प्रेषितवान्।

(ङ) एकः यात्री तं कटुवचनानि वदति स्म।

20. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (1×5=5)

(क) <u>महर्षिः</u> भारते अभ्रमत्।

(ख) गुरोः आज्ञा पालनीया एव।

(ग) मूषकाः चकिताः भवन्ति।

(घ) आचार्यः शिष्यम् उपदिशति।

(ङ) वचने दरिद्रता न भवेत्।

21. अधोलिखितानां पदानां उचितार्थैः सह मेलनं कुरुत - (½×4=2)

| | |
|---|---|
| (क) वृत्तं | (i) पश्चात् |
| (ख) अर्थम् | (ii) कुम्भः |
| (ग) अनन्तरेम् | (iii) चरित्रम् |
| (घ) घटः | (iv) धनम् |